# කැලණිය විශ්වවිද්‍යාලය - ශ්‍රී ලංකාව

## බාහිර විභාග අංශය

**ශාස්ත්‍රවේදී (සාමාන්‍ය) උපාධි තෘතීය පරීක්ෂණය (බාහිර) - 2009**
**2010 අගෝස්තු / සැප්තැම්බර්**

**මානවශාස්ත්‍ර පීඨය**

**සංස්කෘත - SANS –E3025**

වෛදික සාහිත්‍යය හා දර්ශන, සංස්කෘත ශාස්ත්‍ර ග්‍රන්ථ

<u>පළමු ප්‍රශ්නයට හා තවත් ප්‍රශ්න හතරකට (04) පිළිතුරු සපයන්න.</u>

ප්‍රශ්න සංඛ්‍යාව : 08 යි          කාලය : පැය 03 යි

---

01. මෙහි දක්වා ඇති සංස්කෘත පාඨ අතරින් කැමති **<u>හතරක්</u>** සිංහලයට පරිවර්තනය කරන්න.

<u>I</u>

६ यत्पुरुषेण हविषा
देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं
ग्रीष्म इध्मः शरद्धविः ॥

७ तं यज्ञं बर्हिषि प्रौक्षन्
पुरुषं जातमग्रतः ।
तेन देवा अयजन्त
साध्या ऋषयश्च ये ॥

८ तस्माद्यज्ञात्सर्वहुतः
संभृतं पृषदाज्यम् ।
पशून्ताँश्चक्रे वायव्यान्
आरण्यान्ग्राम्याश्च ये ॥

## II

१. रोहण्यसि रोहण्यस्थ्नश्छिन्नस्य रोहणी। रोहयेदमरुन्धति॥

२. यत्ते रिष्टं यत्ते द्युत्तमस्ति पेष्ट्रं त आत्मनि।
धाता तद्भद्रया पुनः सं दधत्परुषा परुः॥

३. सं ते मज्जा मज्ज्ञा भवतु समु ते परुषा परुः।
सं ते मांसस्य विस्रस्तं समस्थ्यपि रोहतु॥

४. मज्जा मज्ज्ञा सं धीयतां चर्मणा चर्म रोहतु।
असृक्ते अस्थि रोहतु मांसं मांसेन रोहतु॥

५. लोम लोम्ना सं कल्पया त्वचा सं कल्पया त्वचम्।
असृक्ते अस्थि रोहतु च्छिन्नं सं धेह्योषधे॥

['අථර්වවේද' IV: 12]

## III

एषोऽग्निस्तपत्येष सूर्य एष पर्जन्यो मघवानेष वायुः।
एष पृथिवी रयिर्देवः सदसच्चामृतं च यत्॥ ५॥

अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।
ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च॥ ६॥

प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राण
प्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठसि॥ ७॥

देवानामसि वह्नितमः पितृणां प्रथमा स्वधा।
ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि॥ ८॥

इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता।
त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः॥ ९॥

(ප්‍රශ්නොපනිෂද්. II,, 5 - 9)

## IV

यदा वा पश्येत्—'परस्यापचरिताः क्षीणा लुब्धाः स्वचक्रस्तेनाटवी-व्यथिता वा प्रकृतयः स्वयमुपजापेन वा मामेष्यन्तीति सम्पन्ना मे वार्ता, विपन्ना परस्य तस्य प्रकृतयो दुर्भिक्षोपहता मामेष्यन्ति, विपन्ना मे वार्ता सम्पन्ना परस्य तं मे प्रकृतयो न गमिष्यन्ति। विगृह्य चास्य धान्यपशुहिरण्यान्याहरिष्यामि, स्वपण्योपघातीनि वा परपण्यानि निवर्तयिष्यामि, परिवणिक्पथाद्वा सारवन्ति मामेष्यन्ति। विगृहीतेनेतरं, दूष्यामित्राटवीनिग्रहं वा विगृहीतो न करिष्यति, तैरेव वा विग्रहं प्राप्स्यति, मित्रं मे मित्रभाव्यभिप्रेतो बह्वल्पकालं तनुक्षयव्ययमर्थं प्राप्स्यति, गुणवतीमादेयां वा भूमिं सर्वसन्दोहेन वा मामनादृत्य प्रयातुकामः कथं न यायात्' इति परवृद्धिप्रतिघातार्थं प्रतापार्थं च विगृह्यासीत।

(අර්ථශාස්ත්‍ර - VII, 4)

V

न धर्मश्चरेत् एष्यत् फलत्वात् सांशयिकत्वाच्च ॥१०॥

कोह्ययबालिशो हस्तगतं परगतं कुर्यात् वरमद्य कपोतः श्वो मयुरात् वरं सांशयिकान्निष्काद सांशयिकः कार्षापण इति लोकायतिकाः ॥११॥

शास्त्रस्यानभिशङ्कयत्वा दभिचारानुव्याहारयोश्च क्वचित् फल दर्शनान्नक्षत्र चन्द्रसूर्यताराग्रहचक्रस्य लोकार्थं बुद्धिपूर्वकमिव प्रवृत्तेर्दर्शनात् वर्णाश्रमाचारस्थिति लक्षणत्वाच्च लोकयात्रायाः हस्तगतस्य च वीजस्यं भविष्यतः स्वार्थे त्यागदर्शनाच्चरेद्धर्मानिति वात्स्यायनः ॥१२॥

नार्थाश्चरेत् प्रयत्नतोऽपिह्येतेऽनुष्ठिय मानानैव कदाचित्स्युः अननुष्ठियमाना अपि यदृच्छया भवेयुः ॥१३॥

[कामसूत्र I, 2, 10-13]

VI

हस्तमान कृतं सर्वम् वितस्त्या गुणितं विधेत्
वितस्त्या कृत मानं च विदध्यादंगुलेन च ॥

पर्वमान कृतंगुण्यं यवमानेन धीमता
यवमान कृतंचापि यूकाहिरपि गुण्यते ॥

एतत् योजित मानेन यूकामानान् न हीनकः
यथोक्त नवमानं स्यादन्यमा नांन पूजितं ॥

हस्तं चतुर्धा त्रिविधं दण्डं वस्तु क्रिया विधौ
उक्तमानेषु सर्वेषु षट्वर्गं वा त्रिवर्गकम् ॥

(वैजयन्ततन्त्र)

02. ඍග් වෛදික ආගම පිළිබඳ විමසීමක් කරන්න.

03. අථර්වන්වේදයේ ස්වරූපය පැහැදිලි කරන්න.

04. ප්‍රශ්නෝපනිෂදයේ එන දාර්ශනික ඉගැන්වීම් පිළිබඳ සමාලෝචනයක් කරන්න.

05. අර්ථ ශාස්ත්‍රයේ එන රාජ්‍ය පාලන උපායයන් කොතෙක් දුරට සාර්ථකදැයි පරීක්ෂා කරන්න.

06. වාත්ස්‍යායන කාමය එකම පුරුෂාර්ථය හැටියට පිළිගත්තේදැයි විමර්ශනය කරන්න.

07. යථාර්ථානුභාව බුද්ධිය ලබා ගැනීමට ප්‍රත්‍යක්ෂ ප්‍රමාණය කොතෙක් දුරට ප්‍රාමාණිකත්වයෙන් යුක්තදැයි පැහැදිලි කරන්න.

08. වෛජයන්ත තන්ත්‍රයේ දැක්වෙන චිත්‍ර කර්මාන්තයට අදාල තොරතුරු පිළිබඳව විමසීමක් කරන්න.

***********************